॥इदंजनाउपश्रुतनराशंसस्तविष्यते।षष्टिंसहस्रानवतिंचकौरमआरुशमेषुदद्महे॥उ
ष्ट्रायस्यप्रवाहणोवधूमंतोद्विर्दश।वर्ष्मारथस्यनिजिहीळतेदिवईषमाणाउपस्पृशः।एषइ
षायमामहेशतंनिष्कान्दशस्रजः।त्रीणिशतान्यर्वतांसहस्रादशगोनां॥इतिनाराशंस्यः।
वच्यस्वरेभवच्यस्ववृक्षेनपक्वेशकुनः।नष्टेजिह्वाचर्चरीतिक्षुरोनभुरिजोरिव।प्ररेभासो
मनीषावृषागावइवेरते।अमोतपुत्रकाएषाममोतगाइवासते।प्ररेभधियंभरस्वगोवि
दंवसुविदं।देवत्रेमांवाचंश्रीणीहीषुर्नवीरमस्तारं॥इतिरैभ्यः।राज्ञोविश्वजनीनस्ययोदेवो
२४ मर्त्याँअति।वैश्वानरस्यसुष्टुतिमासुनोतापरिक्षितः।परिछिन्नःक्षेममकरत्तमासनमास
रं।मरायन्कृण्वन्कौरव्यःपतिर्वदतिजायया।कतरत्तआहराणिदधिमंथांपरिश्रुतां।जा
याःपतिंविपृच्छतिराष्ट्रेराज्ञःपरिक्षितः।अभीवस्वःप्रजिहीतेयवःपक्वःपथोबिलं।जनः
सभद्रमेधतराष्ट्रेराज्ञःपरिक्षितः॥इतिपारिक्षित्यः।इंद्रःकारुमबूबुधदुत्तिष्ठविचराजनं।मम

उग्रस्यचर्कृधिसर्वइत्तेपृणादुरिः।इहगावःप्रजायध्वमिहाश्वाइहपूरुषाः।इहोसह
१ स्रदक्षिणोवीरस्त्रातानिषीदतु।नेमाइंद्रगावोरिषन्मोआसांगोपरीरिषत्।मासामम
मित्रयुर्जनइंद्रमास्तेनईशत।उपनोनरमसिसूक्तेनवचसावयंभद्रेणवचसावयं।व
नादधिध्वनोगिरोनरिष्येमकदाचन।इतिकारव्याः।यःसभेयोविदथ्यःसुत्वायज्वाथ
पूरुषः।सूर्यंचामूरिशादसस्तद्देवाःप्रागकल्पयन्।योजाम्याअप्रत्तमदयःसखायंनिनि
त्सति।ज्येष्ठोयदप्रचेतास्तदाहुरधरागिति।यद्भद्रस्यपुरुषस्यपुत्रोभवतिदाधृषिः।तद्वि
प्रोअब्रवीदुतद्गंधर्वःकाम्यंवचः।यश्चपणिरभुजिष्योयश्चदेवांअदाशुरिः।धीराणांशश्व
तामहंतदपागितिशुश्रुम।येचदेवाअयजंताथोयेचपराददिः।सूर्योदिवमिवगत्वायमघवा
नोविरप्शते।इतिदिशांक्लृप्तयः।योनाक्ताक्षोअनभ्यक्तोअमणिवोअहिरण्यवः।अब्रह्माब्रह्म
णस्पुत्रस्तोताकल्पेषुसंमितः।यआक्ताक्षःस्वभ्यक्तःसुमणिःसुहिरण्यवः।सुब्रह्माब्रह्मणस्पुत्र बीव

स्तोता कल्पेषु संमितः।अप्रपाणाव षेशं तारेवां अप्रदद्दिश्चयः।अयमाकन्याक्ष
ल्पाणीतोता कल्पेषु संमिता।स्तुजपाणाव वेशं तारेवांत्सुप्रदद्दिश्चयः।स्तुयमाकन्याक्ष
ल्पाणीतोता कल्पेषु संमिता।वावातारव महिष्यनस्ताव युधिंगमः।अनाप्तुरश्वआयामी
तोता कल्पेषु संमिता।परिवृक्ता यमहिषीविस्वस्ताव युधिंगमः पाप्तुरश्वप्रायामीतो
ता कल्पेषु संमिता।इति जनकल्पाः।यदिंद्रादीदाशराज्ञे मानुषं व्यगाहथाः।विरूपः स
र्वस्मा आसीत्सह गक्षाय कंवते।त्वं विघाक्षमघवन्नम्रं पर्या किरोरभिः।त्वं रौहिणं व्यास्यस्त्वं
वृत्रस्याभिनच्छिरः।यः पर्वतान्व्यदधाद्यो अपो व्यगाहथाः।यो वृत्रं वज्रहन्नहं स्तस्मा इंद्र नमो
स्तुते।प्रहिं घावंतं हर्यौरौच्चैश्रवसमब्रुवं।स्वस्त्यश्वजैत्रायेंद्र मा वह सुस्रजं।यत्वा श्वेता
उच्चैश्रवसं हर्योर्युंजंतिदक्षिणं।मूर्धानमश्वं देवानां बिभ्रदिंद्र महीयसे।इतीद्रगाथाः।ए
ता अश्वा आप्लवंते।प्रतीपं प्रातिसत्वनं।तासामेका हरिक्निका।हरिक्निके किमिच्छसि।सा

पुंस्त्वंहिरण्मयं। काहकेपरास्यः। यत्राऋसिस्तः। शिंशपाः। परित्रयः। इराकवः। श्रृंगंधर्म
तंआसते। अयंमहांतेअवहि। सइत्पकेसएवके। सघाघतेसघाघमे। गोमीघगो
मिनीरसिः। कुमारन्नन्नेनिनित्साति। बद्धेवयोइति। बद्धबोअथोइति। अजकारको
विका। अश्वस्यवालोगोशफः। केशिनीश्यनीएनीया। अनामयोपजिह्विका। ओअं
बकुलिमा पुनि। कोअर्जुन्याःपयः। कोअसिक्न्याःपयः। एतंष्टकुहंष्टके। कुहाकेप
द्धकेष्टको। यज्ञाहंतिश्वभिक्कुनिः। अकुम्पंतःकुनापवः। आमणकोमणत्यकः। देवत्क
प्रतिहर्यः। पिनष्टिपत्निकाहविः। प्रवृद्धदोमधायति। श्रृंगउत्पत। मात्वाविसखाना
विदन्। वशाधाःपुत्रमायांतं। इरावेदुममंदत। इयन्तियन्तीति। अथोइयन्ति
ति। अथोज्यापस्तरोजुवत्। इयंयकाशलाकका। आभिलोतिनिमज्यते। तस्या
अनुनिनंजनं। वरुणोयातिवकृभिः। शतंबभ्रोरभीशवः। शतंकशाहिरण्ययीः। आहल
शतंरथाहिरण्ययाः॥१

कुःशावर्त्तकः। आयवनेनतेजनिः। शक्रेनपीवश्रोहति। वनिष्ठुनोपन्तृत्पान्ति। इमंमस्य
मृदुरिति। तेरक्षाःसहतिछंति। पाकवलिःशक्रवलिः। अश्वत्थःस्वपुरोधवः। अरदुः
परमशये। हतइवपापहरूषः। अहोहमितनपीमूषकं। दोचहस्तिनोदत्तो। अध्य
र्द्धंचपरस्वतः। आरत्नाबुकेमेक्कं। अलाबुकंनिखातकं। कर्करिकोनिखातकः। त
ग्रं५ द्वात उन्मथाइतिकुत्तायंकरवौँ इति। उँवलिशदाननं। नवलिशदनातनं। क
एधांककेरीँरि खवत्। कएबांकुंकुभिंहनत्। पंदीहनत्कथंहमत्। देलीहनत्क
थंहनत्। पर्यकारंपुनःपुनः। इत्येतशप्रलापाः। विततोद्भिरग्लैदोतावापिनस्त्रि
रूपः। नवैकुमारितनथायथाकुमारिमन्यसे। मातुष्टद्भिरग्लैर्लोनीवीतःउग्रमा
हते। नःसे। निगल्हकर्त्तकोदोनिरायच्छसिमध्यमां। नःसे। उत्तानायैशयानायैतिष्ठ

न्वेवा व गूहसि । न॰ से॰ । लक्ष्मणायां च हिरण्यायां लक्ष्मणमेवा व गूहसि । न॰ से॰ ।
व लक्ष्मणाम व ल्मशादं तल्लोमव तिष्ठदे । नवै कुमारिसे । इति प्रवह्लिकाः । इहेत्थ प्राग
पागुदगधराक् । अराला उद्भर्त्सयतो । इहे॰ क् । वत्साः पुरुषंत आसते । इहे॰ क् । सवीपु
स्थालिलीशये । इ॰ क् । स्थालीपाको विलीयते । इत्याजिज्ञासेन्याः । भुगित्यभिगतः
। शारित्यभिष्ठितः । कलिस्यपक्रांतः । इति प्रतिराधः । वीमे देवा अक्रंसत ताध्वर्यो क्षिप्रं
प्रचर । सुशस्तिरिद्गवामस्यति प्रखिदसोमेहा । इत्यतिवादः । आदित्या ह जरित
रंगिरोभ्यो दक्षिणामनयन् । तां ह जरितर्न प्रत्यायन् । तामु ह जरितः प्रत्यायन्
। तां ह जरितर्न प्रत्यगृभ्णन् । तामु ह जरितः प्रत्यगृभ्णन् । अहानेतरसन्नविचेत
नानि । यज्ञानेतरसन्नपुरोगवासः । उत श्वेत आशुपत्वा । उतो पद्याभिर्जवि

षः। छंतेमा मुमानं पिपर्ति॥ आदित्यो वसवस्त्वेळते। इदं राधः प्रतिगृभ्णीह्यंगिरः
। इदं राधो बृहत्पृथु। देवा ददत्वासुरं। तद्वो अस्तु सुचेतनं। युष्मे अस्तु दिवेदिवे। प्रत्ये
व गृभायत। इति देवनीथाः। त्वमिंद्र शर्म रिणा हव्यं पारावतेभ्यः। विप्राय स्तुवते वसु
नि दुरश्रवसे वह। त्वमिंद्र कपोताय छिन्नपक्षाय वंचते। श्यामाकं पक्वं पीलु च
वारस्मा अकृणोर्बहु। अरंगरो वावदीति त्रेधा बद्धो वरत्रया। इरामह प्रशंसत्यनि
राममुपसेधत। इति भूतेछदः। यदस्या अंहुभेद्याः कृधु स्थूलमुपातसत्। मुष्काविं
दस्या एजतो गोशफे शकुलाविव। यदा स्थूलेन पससाणौ मुष्का उपावधीत्। वि
ष्वंचा वस्या वर्द्धतः सिकतास्विव गर्दभः। यदल्पिकास्वल्पिका कर्कंधुकेव पद्यते
। वासंतिकमिव तेजनं यन्त्यवाताय वित्पति। यद्देवासो ललामगुं प्रविष्टीमिनमावि

कुं.प
४

कृप:१

पुः। सरन्नादेहस्यतेनारीसंसाक्षीवमोयथा। महासग्न्युपक्रूते अभ्यस्यावेशितं
पसः। ईहक्षुकलस्यहहस्यम्रर्पंम्रपंभिजेमहि। महासग्न्यहस्तंहिसोक्रंददत्तमा
सरत्। शङ्ककाननाशकामशवंसन्न्युदधमत्। महासग्न्युत्स्रवलमतिक्रा
मंत्यब्रवीत्। यथैवनेवनस्पतेपिघ्नंतितथैवने। महान्वैमद्रोबिल्वोमहान्यक्कउदु
वरः। महाँश्चभिनुबाधतेमहतःसाधुखोदनं॥ इत्याहनस्याः॥ ॥इति कुंतापाध्या
यः॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥

॥इदं पुस्तकं रामरुद्रोपनामकविश्वनाथमहात्मजनीलकंठस्य॥ संवत् १७९० समये वैशाखशुद्ध ५
लिखापितम्॥ श्रीरस्तु॥

शिव
४